# ॥ शिवपञ्चाक्षर स्तोत्रम् ॥

ॐ नागेन्द्रहाराय त्रिलोचनाय । भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय । तस्मै ‘न’ काराय नम: शिवाय ॥१॥
मन्दाकिनीसलिलचन्दनचर्चिताय । नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय । तस्मै ‘म’ काराय नम: शिवाय ॥२॥
शिवाय गौरीवदनाब्जवृन्दसूर्याय । दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय । तस्मै ‘शि’ काराय नम: शिवाय ॥३॥
वसिष्ठकुम्भोभ्दवगौतमार्यमुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय । तस्मै ‘व’ काराय नम: शिवाय ॥४॥
यक्षस्वरुपाय जटाधराय । पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय । तस्मै ‘य’ काराय नम: शिवाय ॥५॥
पञ्चाक्षरमिदं पुण्यं । य: पठेत् शिवसन्निधौ ।
शिवलोकमवाप्नोति । शिवेन सह मोदते ॥६॥